# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा -दिसम्बर, २०१८

| | | |
|---|---|---|
| **कक्षा - आचार्यप्रथमवर्षम्** (SEM-1) | **प्रश्नपत्रम् – ४** | |
| **विषय: - साहित्यम् ( नाट्यवर्ग: )** | (CC-4.1.3.4 New) | **गुणा: - ७०** |
| **दिनाङ्क: -१८/१२/२०१८** | **ग्रन्थ: नाट्यशास्त्रम्- ( १-२ अध्यायौ )** | **समय: -०२.०० त: ०५.००** |

**प्रथमान्विति:**

**प्रश्न: १ ( अ ) अधोनिर्दिष्टाभ्यामेकस्या: कारिकाया: ससन्दर्भं व्याख्यां कुर्वन्तु ।** **( ०५ )**

( १ ) योऽयं भगवता सम्यग्ग्रथितो वेदसम्मित: ।
नाट्यवेद: कथं ब्रह्मन्नुत्पन्न: कस्य वा कृते ॥

( २ ) कुशला ये विदग्धाश्च प्रगल्भाश्च जितश्रमा: ।
तेष्वयं नाट्यसंज्ञो हि वेद: संक्राम्यतां त्वया ॥

**प्रश्न: १ ( ब )** नाट्यशास्त्रानुसारं नाट्योत्पत्तिकथां विवेचयन्तु । **( १० )**

**अथवा**

नाट्यशास्त्रस्य मङ्गलाचरणं विलिख्य नाट्यशास्त्रस्य बीजं निरूपयत ।

**द्वितीयान्विति:**

**प्रश्न: २ ( अ ) अधोनिर्दिष्टाभ्यामेकस्या: कारिकाया: ससन्दर्भं व्याख्यां कुर्वन्तु ।** **( ०५ )**

( १ ) नायकं रक्षतीन्द्रस्तु नायिकाञ्च सरस्वती ।
विदूषकमथौङ्कार: शेषास्तु प्रकृतीर्हर: ॥

( २ ) नैकान्ततोऽत्र भवतां देवानां चानुभावनम् ।
त्रैलोक्यस्यास्य सर्वस्य नाट्यं भावानुकीर्तनम् ॥

**प्रश्न: २ ( ब ) टिप्पणीद्वयं लिखत ।** **( १० )**

( १ ) नाट्यगृहस्य निर्माणम् ।

( २ ) नाट्यगृहस्य रक्षकदेवता: ।

( ३ ) जर्जर:।

( ४ ) नाट्यमण्डपस्य देवतानां पूजाविधानम् ।

**तृतीयान्विति:**

**प्रश्न: ३ ( अ ) अधोनिर्दिष्टाभ्यामेकस्या: कारिकाया: ससन्दर्भं व्याख्यां कुर्वन्तु ।** **( ०५ )**

( १ ) देवानां तु भवेज्ज्येष्ठं नृपाणां मध्यमं भवेत् ।
शेषाणां प्रकृतीनां तु कनीय: संविधीयते ॥

(२) भूमेर्विभागं पूर्वं तु परीक्षेत प्रयोजक: ।
ततो वास्तुप्रमाणेन प्रारभेत शुभेच्छया ॥

**प्रश्नः ३ (ब)** प्रेक्षागृहाणां भेदान् विलिख्य तेषां प्रमाणानि लक्षणानि च निरूपयत। (१०)

**अथवा**

नाट्यनिर्माणे सूत्रप्रसारणविधिं समीक्षयन्तु ।

**चतुर्थान्वितिः**

**प्रश्नः ४ (अ) अधोनिर्दिष्टाभ्यामेकस्या: कारिकाया: ससन्दर्भं व्याख्यां कुर्वन्तु ।** (०५)

(१) स्तम्भस्योत्थापने सम्यग्दोषा ह्येते प्रकीर्तिता: ।
अवृष्टिरुक्ता चलने वलने मृत्युतो भयम् ॥

(२) अष्टहस्तं तु कर्तव्यं रंगपीठं प्रमाणत: ।
चतु:स्तम्भसमायुक्ता वेदिकायास्तु पार्श्वत: ॥

**प्रश्नः ४ (ब) टिप्पणीद्वयं लिखत ।** (१०)

(१) त्र्यश्रप्रेक्षागृहम् ।

(२) स्तम्भस्थापनविधि:

(३) मत्तवारणी ।

(४) रङ्गपीठम् ।

**प्रश्नः ५ निम्नलिखितेभ्य: दशप्रश्नानाम् उत्तराणि एकैकवाक्यै: ददतु ।** (१०)

*(१)* ब्रह्मणा नाट्यनिर्माणाय यजुर्वेदात् किम् स्वीकृतम् ?

*(२)* विघ्नकर्तार: के सन्ति ?

*(३)* वृत्तय: कति ? का: च ता: ?

*(४)* रंगपीठस्य मध्ये क: प्रतिष्ठित: ?

*(५)* नाट्यगृहस्य रक्षणाय देहल्याम् कस्य नियुक्ति: कृता ?

*(६)* आचार्यभरतस्य कति पुत्रा: आसन् ?

*(७)* कीदृशं रंगशीर्षं प्रशस्यते ?

*(८)* प्रथमस्तंभ: कस्यां दिशि स्थापनीय: ?

*(९)* चतुरस्रनाट्यगृहस्य किं परिमाणम् ?

*(१०)* नाट्यशास्त्रस्य द्वितीयाध्यायस्य विषयवस्तु किम् ?

*(११)* शूद्ररूप: स्तंभ: कस्यां दिशि स्थापनीय: ?

*(१२)* नाट्यशास्त्रस्य प्रथमाध्यायस्य नाम किम् ?

*(१३)* नाट्यगृहस्य त्रीन् परिमाणान् लिखत ।

*(१४)* नाट्यकर्मणि कानि नक्षत्राणि उत्तमानि ?

*(१५)* नाट्यमण्डपस्य रक्षणाय विशेषरूपेण कस्य नियुक्ति: कृताऽस्ति ?